**प्रश्नः) किरातार्जुनीयमिति महाकाव्यस्य प्रथमसर्गे वर्णितानां युधिष्ठिरं प्रति वनेचरस्य उक्तीनां पर्यालोच्यताम्।**

**उत्तरः)** महाभारतस्य वनपर्वतः काहिनीं संगृह्य कविभारविना अष्टादशसर्गेषु रचितम् किरातार्जुनीयम् इति महाकाव्यम्। वनेचरेण युधिष्ठिराय दुर्योधनस्य प्रजापालनवृत्तान्तं तथा द्रौपद्याः युधिष्ठिरं प्रति निन्दाभाषः अस्य महाकाव्यस्य प्रथमसर्गस्य मुख्यविषयः। राज्यं हारयित्वा युधिष्ठिरः अधुना द्वैतवने निवसति। तस्य मनसि कुरुप्रदेशस्य राज्यशासनव्यवस्था कीदृशा प्रचलति इति उदिते सति तेन कमपि वनेचरं चररूपेण कुरुप्रदेशे प्रेषितः। स चरः तत्र गत्वा सम्यग् अवगम्य युधिष्ठिरं निकषा प्रत्यागम्य च युधिष्ठिरं सर्वं वदति।

चरः भवति नृपतिणां चक्षुस्वरूपः यथा- 'क्रियासुयुक्तैर्नृप चारचक्षुषः'। एकत्र स्थित्वा राजा कदापि स्वराजस्य अपरराज्यस्य च वार्तां न प्राप्नुयात्। अतः चराणां भूमिका राज्यशासनपरिचालनायाम् अत्यन्ता आवश्यिकी। राज्ञः समीपे चरस्य आचरणं कीदृग् भवति तत् आदौ चरेण युधिष्ठिराय उक्तम्। एकः चरः तस्य प्रभवे कदापि मिथ्यावचनं मा वदेत्। मिथ्यावचनस्य प्रभावे स्वस्य हानिः अपि तु राज्यस्य। यद्यपि सत्यवचनं सदा कठोरम् अतः तस्य अनुभवः तिक्तरूपम्। सर्वे अप्रियं सत्यं श्रोतुं न इच्छन्ति। परन्तु चरः मृषा प्रवक्तुं न इच्छन्ति युधिष्ठिराय यथा- 'न हि प्रियं प्रवक्तुं इच्छन्ति मृषा हितैषिणः'। यः राजा कठिनं सत्यं श्रुत्वा चराय जिघांसति स खलु कपटराजा। हितोपदेशः श्रवणे तस्य इच्छा नास्ति। अपि तु यः सचिवः राज्ञे सदुपदेशं न ददाति स खलु कपटसचिवः इति चरेण युधिष्ठिरं प्रति उक्तम्। अतः राजामन्त्रिणोः एकानुकुल्येन धनसम्पत्तीनां वृद्धिः भवति यथा - "सदानुकुलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः।।" इति।

तदनन्तरं चरः युधिष्ठिराय दुर्योधनस्य प्रजाशासनवृत्तान्तं सौष्ठवौदार्यबिशेषशालिवाक्येन उक्तवान्। कपटद्यूतक्रीडया राज्यम् अधिकृत्य दुर्योधनः अधुना तस्य पूर्णसत्त्वालाभे उद्ग्रीवः। अतः सः आत्मनः सुगुणप्रचारे

अभिलाषी। प्रजावर्गाणां समीपे दुर्योधनः अधुना आत्मनः जितेन्द्रिता, निर्लोभता, अक्रोधता, श्रद्धा, क्षमा, आनुगत्यता, कृतज्ञता, उदारता, निरभिमानीता, दया चेति गुणान् दर्शयति। सुविचारेण सह सः सामदानदण्डभेदानां प्रयोगं करोति। यथा –

"कृतारिषड्वर्गजयेन मानवीमगम्यरूपां पदवीं प्रपित्सुना।
विभज्य नक्तंन्दिवमस्ततन्द्रिणा वितन्यते तेन नयेन पौरुषम्।।'' इति।

एतादृशेन आचरणेन आकृष्टाः सन्तः सर्वेः सैनिकाः तस्य प्रियकार्यसाधनरताः। प्रजाः अपि सदा तस्य सभामण्डपे उपस्थिताः धनादिलाभार्थम्। एतावत् सुव्यवस्थायां कृतायां सति स दुर्योधनः युधिष्ठिरात् पराजयः आशङ्कते यथा –

"विश्वङ्कमानो भवतः पराभवं नृपासनस्थोऽपि वनाधिवासिनः।'' इति।

अतः युधिष्ठिरं प्रति वनेचरः वदति दुर्योधनस्य शास्तिप्रदानाय शीघ्रं काचित् व्यवस्था अवलम्बनीया यथा-

"तदाशु कर्त्तुं त्वयि जिह्ममुद्यते विधीयतां तत्र विधेयमुत्तरम्।
परप्रणीतानि वचांसि चिन्वतां प्रवृत्तिसाराः खलु मादृशां गिरः।।'' इति शिवम्।

****************************************

GGDC SALBONI